श्री पराशर संहिता

त्रिनवतितमः पटलः

-: श्री हनुमत् स्तवराजः :-

श्री पराशरः :-

श्लो॥ अन्यत्स्तोत्रं प्रवक्ष्यामि - शृणु मैत्रेय योगिराट्
स्तवराज मिति ख्यातं - त्रिषु लोकेषु दुर्लभम् ॥ १

शम्भुना चोपदिष्टं च - पार्वत्यै हितकाम्यया
सर्वकामप्रदं नृणां - भुक्ति मुक्ति फलप्रदम् ॥ २

व॥ अस्य श्री हनुमत् स्तवराज स्तोत्र मन्त्रस्य वशिष्ठ भगवान् ऋषिः ।
अनुष्टुप्छन्दः । श्री हनुमान् देवता । ह्रां बीजं । ह्रीं शक्तिः । ह्रूं
कीलकं । मम श्री हनुमत्प्रसाद सिध्यर्थे जपे विनियोगः ।
[मूलेन न्यासं कृत्वा ।] ३

ध्यानम् :-

श्लो॥ उद्यन्मार्तंडकोटि प्रकट रुचिकरं चारु वीरासनस्थम्
मौंजी यज्ञोपवीताभरण मुरुशिखा शोभितं कुन्डलांगम्
भक्तानामिष्टदं तं प्रणुत मुनिजनं वेदनाद प्रमोदम्
ध्यायेद्देवं विधेयं प्लवगकुलपतिं गोष्पदीभूतवार्धिम् ॥ ४

श्री हनुमान्महावीरो - वीरभद्रवरोत्तमः
वीर श्शक्तिमतां श्रेष्ठो - वीरेश्वर वरप्रदः ॥ ५

यशस्करः प्रतापाढ्यो - सर्वमङ्गल सिद्धिदः
सानन्दमूर्तिर्गंहनो - गम्भीर स्सुरपूजितः ॥ ६

दिव्यकुन्ड़लभूषाय - दिव्यालङ्कार शोभिने
पीताम्बरधर प्राज्ञ - नमस्ते ब्रह्मचारिणे ॥ ७

कौपीन वसनाक्रान्त - दिव्व यज्ञोपवीतिने
कुमाराय प्रसन्नाय - नमस्ते मौंजिधारिणे ॥ ८

सुभद्रश्शुभदात्रेच - सुभगो रामसेवकः
यशःप्रद महातेजा - बलाढ्यो वायुनन्दनः ॥ ९

जितेन्द्रियो महाबाहो - वज्रदेहो नखायुधः
सुराध्यक्ष महाधुर्य - पावनो पवनात्मजः ॥ १०

बन्धमोक्षकर श्शीघ्र - पर्वतोत्पाटनाय च
दारिद्र्यभञ्जन श्श्रेष्ठ - स्सुखभोग प्रदायकः ॥ ११

वायुजात महातेजाः - सूर्यकोटि समप्रभः
सुप्रभा दीप्तिमद्भूत - दिव्य तेजाय ते नमः ॥ १२

अभयङ्कर मुद्राय - अपमृत्यु विनाशिने
संग्रामे जयदात्रे च - अविज्ञाय नमोनमः ॥ १३

तत्त्वज्ञानामृतानन्द - ब्रह्मज्ञो ज्ञानपारगः
मेघनाद प्रमोहाय - हनुमद्ब्रह्मणे नमः ॥ १४

रुच्याढय दीप्त बालार्क - दिव्यरूप शुशोभित
प्रसन्नवदन श्रेष्ठ - हनुमान् वै नमोस्तुते ॥ १५

दुष्टग्रह विनाशाय - दैत्य दानव भञ्जनः
शाकिन्यादिषु भूतघ्न - नमोस्तु श्रीहनूमते ॥ १६

महाधैर्य महाशौर्य - महावीर्य महाबल
अमेय विक्रमायैव - हनुमन् वै नमोस्तुते ॥ १७

दशग्रीव कृतान्ताय - रक्षःकुल विनाशिने
ब्रह्मचर्य व्रतस्थाय - महावीर नमोस्तु ते ॥ १८

भैरवाय महोग्राय - भीमविक्रमणाय च
सर्वज्वर विनाशाय - कालरूपाय ते नमः ॥ १९

सुभद्रद स्सुवर्णांग - सुमङ्गल शुभंकर
महाविक्रम सत्वाढ्य - दिङ्मण्डल सुशोभित ॥ २०

पवित्राय कपीन्द्राय - नमस्ते पापहारिणे
सुविद्य रामदूताय - कपिवीराय ते नमः ॥ २१

तेजस्वी शत्रुहावीर - वायुज स्संप्रभावनः
सुन्दरो बलवान् शान्त - आञ्जनेय नमोस्तु ते ॥ २२

रामानन्द जयकर - जानकीश्वसदाय वै
विष्णुभक्त महाप्राज्ञ - पिङ्गाक्ष बिजयप्रद ॥ २३

राज्यप्रद सुमाङ्गल्य - सुभगो बुद्धिवर्धनः
सर्वसम्पत्ति दाता च - दिव्यतेज नमोनमः ॥ २४

कल्याण कीर्त्या जयमङ्गलाय जगत्तृतीयं धवलीकृताय
तेजस्विने दीप्त दिवाकराय नमोस्तुदीप्ताय हरीश्वराय २५

महाप्रतापाय विवर्थनाय मनोजवा याद्भ्र,तवर्धनाय
प्रौढप्रतापारुण लोचनाय नमोऽञ्जनानन्द कपीश्वराय २६

कालाग्निदैत्य संहर्ता - सर्वशत्रू विनाशन
अचलोद्धारकश्चैव - सर्वमङ्गल कीर्तिद ॥ २७

बलोत्कट महाभीम - भैरवोऽमितविक्रम
तेजोनिधिः कपिश्रेष्ठ - सर्वारिष्टार्ति दुःखहा ॥ २८

उदधिक्रमणश्चैव - लङ्कापुर विदाहक
सुभुजो द्विभुजो रुद्रः - पूर्णप्रज्ञोऽनिलात्मज ॥ २९

राजवश्यकर श्चैव - जनवश्यं तथैव च
सर्ववश्यं सभावश्यं -नमस्ते मारुतात्मज ॥ ३०

महापराक्रमाक्रान्त - यक्षराक्षस मर्दन
सौमित्रि प्राणदाता च - सीताशोक विनाशन ॥ ३१

रक्षोध्नायाञ्जनासूनो – केसरीप्रियनन्दन
सर्वार्थिदायको वीर - मल्लवैरि विनाशन ॥ ३२

सुश्रुखाय सुरेशाय - शुभदाय शुभात्मने
प्रभावाय सुभावाय - नमस्तेऽमित तेजसे ॥ ३३

वायुजो वायुपुत्र श्च - कपीन्द्रः पवनात्मजः
वीरश्रेष्ठ महावीर - शिवभद्र नमोस्तुते ॥ ३४

भक्तप्रियाय वीराय - वीरभद्राय ते नमः
स्वभक्तजन पालाय - भक्तोद्धान विहारिणे ३५

दिव्यमाला सुभूषाय - दिव्यगन्धानुलेपनः
श्रीप्रसन्न प्रसन्नाय - सर्वसिद्धिप्रदो भव॥ ३६

वातात्मज मिदं स्तोत्रं - पवित्रं यः पठे न्नरः
अचलां श्रिय माप्नोति - पुत्रपौत्रादि वृद्धिदम् ॥ ३७

धनधान्य समृद्धिं च - आरोग्यं पुष्टिवर्धनम्
बन्धमोक्षकरं शीघ्रं - लभते वांछितं फलम् ॥ ३८

राज्यदं राजसन्मानं - संग्रामे जयवर्धनम्
सुप्रसन्नो हनूमान्मे - यशः श्री जयकारकः ॥ ३९